संस्कृत-वार्ताः

दिनाङ्क :-11.10.2025 प्रातः - 06:55

<u>अथ वार्ताः</u>

## प्रधानमन्त्री-द्विदल

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्याम् एकस्मिन् विशिष्ट-कृषि-कार्यक्रमे प्रायः द्विचत्वारिंशत् सहस्र-कोटिरूप्यकाणां कृषि-सम्बद्ध-क्षेत्राणां बहुविध-परियोजनानाम् उद्घाटनम्, शिलान्यासं च करिष्यति। श्रीमोदी पी.एम. धन- धान्य-योजना अपि च द्विदलधान्य-मिशन् इत्यस्मिन् स्वावलंबनम् इति द्वयोः प्रमुखयोः उपक्रमयोः आरम्भं करिष्यति। कृषि-मन्त्रालयः प्रख्यापितवान् यत् पी. एम्. धन-धान्य -कृषि-योजनायाः अन्तर्गतं, कृत्स्ने देशे शतशः न्यून-उत्पादक-मण्डलेषु समग्र-कृषि-विकासः भविष्यति, यस्य उद्देश्यं कृषकाणां आयः महत्त्वपूर्णरूपेण वर्धयितुं अस्ति। कार्यक्रमावधौ प्रधानमन्त्री कृषकैः सहापि संवादं करिष्यति। अवसरेऽस्मिन् प्रधानमन्त्री कृषिक्षेत्रे, पशुपालनक्षेत्रे, मत्स्यपालनक्षेत्रे, खाद्यसंस्करणक्षेत्रे च सार्द्ध-चतुःशताधिक पञ्चसहस्र-कोटिरूप्यकाणां परियोजनानाम् उद्घाटनं करिष्यति तथा च प्रायः पञ्चदशाधिक-अष्टशत कोटिरूप्यकाणाम् अतिरिक्तपरियोजनानां शिलान्यासम् अपि करिष्यति।

## बिहार-निर्वाचन

बिहार्-राज्ये विधानसभा-निर्वाचनस्य कृते एन्. डी. ए-पक्षे आसनविभाजनविषयः अनेक-वार्तालापानाम् अनुनयस्य च अनन्तरं समाप्तः अभवत्। एन्. डी. ए. पक्षस्य प्रमुखाः नेतारः शीघ्रमेव आसन-विभाजन-व्यवस्थां घोषयेयुः इति अपेक्ष्यते। दलस्य राष्ट्रिय-अध्यक्षः जे. पी. नड्डा अद्य नवदिल्ल्यां मुख्य-समिति-सभायाः अध्यक्षता करिष्यति। अवधेयं यत् राज्ये विधानसभानिर्वाचनं द्वयोः चरणयोः भविष्यति। प्रथमस्य चरणस्य मतदानं नवम्बरमासस्य षष्ठ-दिनाङ्के भविष्यति।

## नोबल

विंशत्यधिक द्विसहस्रतमवर्षस्य नोबल-शान्तिपुरस्कारः मारिया कोरिना मचाडो इत्यस्मै प्रदत्तः। वेनेजुएला-देशस्य जनानां कृते लोकतान्त्रिक-अधिकाराणां प्रचारार्थं अतिशयकार्यस्य कृते पुरस्कारोऽयं प्रदत्तः। वेनेजुएला-देशे लौह-महिला इति नाम्ना अपि प्रसिद्धा मचाडो इत्येषा विंशत्यधिक द्विसहस्रतमवर्षस्य टाइम- पत्रिकायाः शतप्रभावशालिनां जनानां सूच्यां सूचीबद्धा आसीत्।

## विदेशमन्त्री-जयशंकरः

विदेशमन्त्रिणा डॉ. एस. जयशंकरेण द्वाविंशतितम-अप्रैलमासस्य पहलगाम-आतङ्क्याक्रमणस्य निन्दायै अफगानिस्तानाय कार्त्तज्ञं प्रकटितम्। नवदिल्ल्यां डॉ. एस. जयशङ्करस्य तथैव अफगानिस्तानस्य विदेशमन्त्रिणः मौलवी अमीर खान मुत्ताकी इत्यनयोः मध्ये सम्पन्न-वार्तायाः अनन्तरम् एकस्मिन् संयुक्त-वक्तव्ये उभौ पक्षौ क्षेत्रीय-देशेभ्यः उत्पद्यमानानां सर्वविध-आतङ्कवादी-कृत्यानां स्पष्टरूपेण निन्दाम् अकुरुताम्। तौ क्षेत्रे शान्तिम्, स्थिरताम् तथा पारस्परिक-विश्वासं संवर्धयितुम् महत्त्वं प्रत्यपादयताम्। अफगान-विदेशमन्त्रिणा पुनरुक्तं यत् अफगान-सर्वकारः कस्मैचिदपि समूहाय व्यक्तये वा भारतस्य विरुद्धम् अफगानिस्तानस्य क्षेत्रस्य उपयोगम् कर्तुम् अनुमतिं नैव दास्यति।

## राजनाथ-आस्ट्रेलिया

रक्षामंत्री राजनाथसिंहः आस्ट्रेलिया-देशस्य सहायक-रक्षामन्त्रिणा पीटर् खलील इत्यनेन सह सिड्नी-नगरे प्रथम-भारत-आस्ट्रेलिया-रक्षा-उद्योग-व्यापार-गोलमेज-सम्मेलनस्य सह-अध्यक्षतां कृतवान्, येन द्वयोः राष्ट्रयोः मध्ये

औद्योगिकसहभागित्वं, क्षमता-विकासः च भवेत्। रक्षामन्त्रिणा राजनाथसिंहेन प्रोक्तं यत् देशः संरचनात्मक-परिष्कारेषु विशेषतः विनिर्माण-क्षेत्रे परिवर्तनशील-यात्रायाम् अस्ति। तेनोदीरितं यत् भारतम् अधुना विश्वस्य चतुर्थ-बृहत्तम-अर्थव्यवस्था तथैव तीव्रतम-विकासशीला अर्थव्यवस्था अस्ति।

**ऋतु-विभागः**

भारत-ऋतु-विभागेन अद्य दक्षिण-आन्तरिक-कर्नाटकस्य, तमिलनाडु-राज्यस्य, पुदुचेरी-राज्यस्य, करैकल्-राज्यस्य च पृथक्-पृथक् स्थानेषु प्रचण्डतः अतिवृष्टेः पूर्वानुमानं प्रकटितम् अस्ति। विभागेन उक्तं यत् अद्य ओडिशा, आन्ध्रप्रदेश, केरल, माहे, नागालैण्ड्, मणिपुर्, मिजोरम्, त्रिपुरा इत्येतेषु प्रदेशेषु प्रचण्डवृष्टिः भवितुम् अर्हति।

**क्रिकेट-क्रीडायां**

क्रिकेट-क्रीडायां, पौरस्त्य क्रीडकःयशस्वी-जायसवालः त्रयोसप्तत्यधिकैकशतं अङ्कं अवाप्य भारतस्य विजयं सुनिश्चितं अकरोत्। इयं हि क्रीडा अरुण जेटली क्रीडांगणे अभवत्।

**।।इति वार्ताः।।**